ब्राह्मण्या गुप्तया सह । विप्लुतौ शूद्रवद्दण्ड्यौ दग्धव्यौ वा कटाग्निना । ब्राह्मणीं यद्यगुप्तान्तु सेवेतां वैश्यपार्थिवौ । वैश्यम्पञ्चशतं कुर्य्यात् क्षत्रियन्तु सहस्रिणम्” इति । पञ्चशतस्य पणशतपञ्चकदण्डभाजामित्यर्थः । एवं सहस्रिणमित्यत्रापि । क्षत्रियस्य गुप्तवैश्यागमने वैश्यस्य च गुप्तक्षत्रियागमने क्रमेण पणसहस्रपणशतपञ्चकं तयोर्दण्डं इत्याह स एव “वैश्यश्चेत् क्षत्रियाङ्गुप्तां वैश्यां वा क्षत्रियो व्रजेत् । यो ब्राह्मण्यामगुप्तायान्तावुभौ दण्डमर्हतः” इति । शूद्रस्यागुप्तोत्कृष्टस्त्रीगमने लिङ्गच्छेदनसर्वस्वापहरणे गुप्तागमने तु बधसर्वस्वापहारौ । तथा च स एव “शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमाचरन् । अगुप्तमङ्गसर्वस्वैर्गुप्तं सर्वेण हीयते” इति । अयञ्च बधाद्युपदेशः प्रजापालनाधिकाराद्राज्ञ एव न द्विजातिमात्रस्य । “ब्राह्मणः परीक्षार्थमपि शस्त्रं नाददीतेति” शस्त्रग्रहणस्य निषिद्धत्वात् । यदा तु राज्ञो निवेदने कालविलम्बेन कार्य्यातिपातस्तदा द्विजातिमात्रस्यापि शस्त्रग्रहणेऽधिकारोऽस्त्येव “शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते । नाततायिबधे दोषो हन्तुर्भवति कश्चन । प्रच्छन्नं वा प्रकाशं वा मन्युस्तं मन्युमृच्छति” इति शस्त्रग्रहणाभ्यनुज्ञानात् । परस्त्रिया सह सम्भाषण कर्त्तुर्दण्डमाह मनुः “परस्य पत्न्या पुरुषः संभाषां योजयेत् सह । पूर्वमाक्षारितो दोषैः प्राप्नुयात् पूर्वसाहसम्” इति । आक्षारितः अभिशस्तः । दोषैः नानास्त्र्युपभोगवाञ्छाभिः । पापबुद्ध्या यः सम्भाषणं करोति तद्विषयमेतत् । अतएव “यस्त्वनाक्षारितः पूर्वमभिभाषेत कारणात् । न दोषं प्राप्नुयात् किञ्चिन्न हि तस्य व्यतिक्रमः” इति । मनूक्तस्य पूर्वसाहसमध्यमसाहसयोरुत्कृष्टसजातीयासम्भाषणादिविषयत्वेन व्यवस्था परिकल्पनीया । परपुरुषेण सह पित्रादिभिर्निषिद्धं सम्भाषणं या करोति सा पणशतं दण्ड्या परस्त्रिया सह पित्रादिभिर्निषिद्धसम्भाषणं यः पुरुषः करोति पणशतद्वयं दण्डनीयः । द्वयोरपि निषिद्धपरस्परसम्भाषणादि कुर्वतोः सम्भोगे यो दण्डः स एव दण्ड इत्याह याज्ञवल्क्यः “स्त्री निषेधे शतं दद्याद् द्विशतन्तु दमं पुमान् । प्रतिषेधे तयोर्दण्डो यथा सङ्ग्रहणे तथा” इति । निषिध्यत इति निषेधः कर्म्मणि घञ् । चारणादिस्त्रीव्यतिरिक्तविषयमेतत् “नैष चारणदारेषु विधिर्नात्मोपजीविषु । सज्जयन्ति हि ते नारीर्निगूढाश्चारयन्ति च” इति मनुस्मरणात् नटाः आत्मोपजीविनः वेशोपजीविनः । एतेषां दारेषु एष विधिर्न सम्भाषणादिनिमित्तकदण्डविधिर्न । परनरे नारीः स्वभार्य्याः सज्जयन्ति पुरुषान्तरे संयोजन्ति प्रच्छन्नीकृत्य चारयन्ति वेत्यर्थः । साधारणस्त्रीगमने दण्डमाह याज्ञवल्क्यः “अवरुद्धासु दासीषु भुजिष्यासु तथैव च । गम्यास्वपि पुमान्दाप्यः पञ्चाशत्पणिकन्दमम्” इति । स्वामिना या शुश्रूषार्थं गृहे एव स्थातव्यमित्येवं पुरुषान्तरोपभोगतो निरुद्धास्ता अवरुद्धाः । पुरुषान्तरेणावरुध्य भुज्यमाना भुजिष्याः या दास्यो भुजिष्या अवरुद्धा वा तासु सर्वपुरुषगम्यास्वपि गमने पञ्चाशत्पणं दण्ड्यः तासामपरपरिगृहीतत्वेन परस्त्रीतुल्यत्वात् । चशब्दाद्वेश्यास्वैरिणीनामपि ग्रहणम् । तास्वपि सर्वपुरुषसाधारणीषु परपरिगृहीतासु गमनेऽयमेव दण्ड इति मन्तव्यम् । एतदेवाभिप्रेत्याह नारदोऽपि “स्वैरिण्यब्राह्मणी वेश्या दासी निष्कासिनी च या । गम्याः स्युरानुलोम्येन स्त्रियो न प्रतिलोमतः । आस्वेव तु भुजिष्यासु दोषः स्यात्परदारवत् । गम्यास्वपि हि नोपेयाद्यत्ताः परपरिग्रहाः” इति । अब्राह्मणीति स्वैरिण्या विशेषणम् । स्वैरिणी स्वतन्त्रा पुंश्चली । निष्कासिनी कुटुम्बान्निर्गतेति मदनरत्ने । स्वाम्यनवरुद्धा दासीति विज्ञानेश्वरमाधवाचार्य्यप्रभृतयः । भुजिष्या सा स्वेति सम्बन्धः । व्यासोऽपि “परोपरुद्धागमने पञ्चाशत्पणिको दमः । प्रसह्य वेश्यागमने दण्डो दशपणः स्मृतः” इति । प्रसह्य वेतनदानं विना अनवरुद्धासु वेश्यादिषु गम्यत्वाभिधानञ्च पापाभावप्रतिपादनार्थं किन्तु राजदण्डाभावप्रतिपादनार्थम् । “पशुवेश्यादिगमने प्राजापत्यं विधीयते” इत्यादिवचनैः प्रायश्चित्तस्मरणात् । बलात्कारेण अनवरुद्धदास्यभिगमने दण्डमाह याज्ञवल्क्यः “प्रसह्य दास्यभिगमे दण्डो दशपणः स्मृतः । बहूनां यद्यकामासौ चतुर्विंशतिकः पृथक्” इति । पुरुषसम्भोगजीविकासु दासीषु स्वैरिण्यादिषु शुल्कदानमन्तरेण बलात्कारेणाभिगच्छतो दशपणो दण्डः । यद्यनिच्छन्तीमेकाम्बलात्कारेण बहवो गच्छन्ति तर्हि प्रत्येकं चतुर्विंशतिपणात्मको दण्ड इत्यर्थः । यदि पुनः सा स्वेच्छया भाटकं गृहीत्वा पश्चान्नेच्छति तदा बलादुपगच्छतामपि बहूनामदोषः यदि